# संस्कृत वार्ता:

दिनाङ्क : 27/04/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- अद्य नवदिल्ल्यां भारत-न्यूजीलैण्ड-देशौ ऐतिहासिकं मुक्तव्यापारसमन्वये हस्ताक्षरं कृतवन्तौ।
- पश्चिमबङ्गालराज्ये विधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय प्रचाराभियानम् अद्य सम्पन्नम्।
- भारतस्य सर्वोच्चन्यायालयेन अद्य एकस्याः महिला-अधिवक्तायाः उपरि तस्याः पतिनाकृत क्रूरतया उत्पीडने स्वयमेव अवधानं स्वीकृतम्, त्रयः चिकित्सालयाः तस्याः आपत्कालिकोपचाराय निराकृतवन्तः इति आरोपस्य अन्वेषणाय आदेशोऽपि प्रदत्तः।
- बाङ्ग्लादेशे कालबैशाखी इत्यनेन वातचक्रेण चतुर्दश जनाः मृताः, अन्ये च अनेके व्रणिताः अभवन्।
- आई. पी. एल. क्रिकेट-क्रीडायां, अद्य दिल्ल्याः अरुण जेटली-क्रीडाङ्गणे, दिल्ली-कैपिटल्स दलं रायल्-चैलेंजरस-बेङ्गळूरु-इत्यमुं दलं सम्मुखी करिष्यति।

---------------------------------------------------------------

<u>भारत-न्यूजीलैण्ड-मुक्तव्यापार</u>

अद्य नवदिल्ल्यां भारत-न्यूजीलैण्ड-देशौ ऐतिहासिकं मुक्तव्यापारसमन्वये हस्ताक्षरं कृतवन्तौ। वाणिज्य-उद्योग-मन्त्रिणः पियूष गोयलस्य, न्यूजीलैण्ड-देशस्य वाणिज्य-मन्त्रिणः टोड मैक्ले-वर्यस्य च उपस्थितौ सन्धेः औपचारिकता अभवत्। दिसम्बर-मासे अन्तिमीकृतः अयं सन्धिः भारतीय-निर्यातानां सर्वासु प्रशुल्करेखासु शतप्रतिशतं यावत् शुल्कमुक्तं प्रवेशं प्रददाति, तथैव विभिन्नेषु सेवाक्षेत्रेषु, यथा शिक्षायां, स्वास्थ्यसेवायां, गतिशीलतायां, निवेशे च अवसरान् उद्घाटयति। न्यूज़ीलैण्ड-देशः अपि भारते वृद्धिं, नवान्वेषणं, उद्योगान् च समर्थयितुं विंशति बिलियन यू. एस. डालर मितस्य दीर्घकालिकं निवेशं कर्तुं स्वीकृतिः प्रदत्तवान्। दुग्धव्यवसायः,

कृषिः इत्यादीनि संवेदनशीलक्षेत्राणि संरक्षितानि एव सन्ति। एकस्मिन् सन्देशे, प्रधानमन्त्री श्रीमोदी उक्तवान् यत् अयं सन्धिः भारतस्य वैश्विक-सहभागितायां ऐतिहासिकं सोपानं निर्दिशति तथा च कृषकाणां, यूनां, उद्यमशीलानां तथा एम. एस. एम. ई. इत्येतेषां कृते नूतनानां अवसराणां सरजनं करिष्यति। न्यूज़ीलैण्ड-देशस्य प्रधानमन्त्री क्रिस्टोफर लक्सन इत्येषः अपि एनं व्यवहारं विशालः अवसरत्त्वेन वर्णितवान्, येन अग्रिमे दशके निर्यातस्य विविधीकरणे, व्यापारस्य सम्वर्धने च साहाय्यं भविष्यति। कार्यक्रमे भाषमाण: श्रीगोयलः अवदत् यत् एफ. टी. ए. इतीदं नवमासेषु एव सम्पन्नम्, यत् दृढं परस्परविश्वासं प्रतिबिम्बयति। श्री गोयलेन उक्तं यत् भारतस्य विकसितराष्ट्रस्य लक्ष्यं प्रति एतत् महत्त्वपूर्णं सोपानम् अस्ति।

श्री मैक्क्ले वर्यः अवदत् यत् अयं सन्धिः निर्यातकेभ्यः प्रमुखाः अवसराः उद्घाटयिष्यति, न्यूज़ीलैण्ड-देशे च सहस्रशः उद्योगाः कल्पयिष्यन्ते। विदेशमन्त्री डा. एस. जयशङ्करः उक्तवान् यत् अयं सन्धिः ऐतिहासिकः , येन आर्थिकसम्बन्धाः सुदृढाः भविष्यन्ति, निवेशाः च वर्धिष्यन्ते।

---

## पश्चिमबङ्गाल- प्रचाराभियान

पश्चिमबङ्गालराज्ये विधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय प्रचाराभियानम् अद्य सम्पन्नम्। अस्मिन् चरणे बुधवासरे अष्ट-निर्वाचनमण्डलेषु आहत्य द्विचत्वारिंशदधिकैक शतासनानां कृते मतदानं भविष्यति। एतेषु मण्डलेषु कोलकाता-उत्तरम्, कोलकाता-दक्षिणं, हावडा, नादिया, उत्तर-24 परगना, दक्षिण-24 परगना, हूगली, पूर्ब-बर्धमानः चास्ति। सर्वेषां प्रमुखाणां दलानां नेतारः मतदातृन् आक्रष्टुं अन्तिम प्रयासं कुर्वन्तः सन्ति। प्रधानमन्त्री तथा भाजपेति दलस्य वरिष्ठः नेता नरेन्द्रमोदी च बैराकपूरे निर्वाचनसमारोहं सम्बोधितवान्। सः अवदत् यत् भाजपेति दलं पश्चिमवङ्गस्य सुरक्षावसरान्, प्रामाणिकं शासनं च सुनिश्चितं करिष्यति, श्रीमोदिना आरोपितम् यत् अस्मिन् टी. एम. सी-दलं पूर्णतया विफलः अभवत् । अपरपक्षे, टी. एम. सी. नेता अभिषेक बनर्जी हरिंघटा तथा धनेखली इत्यत्र जनसभाम् अभिसंबोधितवान्।

-------------------------------------------------------------

## प्रधानमंत्री-सिक्किम यात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य आरभ्य सिक्किम्-राज्यस्य द्विदिवसीय-यात्रायां अस्ति। स: अद्य गंगटोक नगरे एकस्मिन् पथ प्रदर्शने भागं भजितवान्। तेन स: राज्यस्य मुख्यमन्त्री प्रेम सिंह तमांग: राज्य भाजपा अध्यक्ष: डी आर थापा च उपस्थितौ आस्ताम् । मङ्गलवासरे, प्रधानमन्त्री गङ्गटोक्-नगरस्य आर्किडेरियम्-इत्यत्र गमिष्यति, यत्र राज्यस्य पारिस्थितिक-पुष्प-परम्परां प्रदर्शयितुं विश्व-स्तरीय-आर्किड्-अनुभव-केन्द्रम् अस्ति। सः पलजोर-क्रीडाङ्गणे सिक्किम-राज्यस्य पञ्चशत्तमस्य राज्यत्व-उत्सवस्य समापनसमारोहे अपि भागं ग्रहीष्यति। अस्मिन् अवसरे, श्रीमोदी सम्पूर्णे राज्ये चतुःसहस्रकोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनं, शिलान्यासं लोकार्पणं च करिष्यति।

-------------------------------------------------------------

## सर्वोच्चन्यायालय

भारतस्य सर्वोच्चन्यायालयेन अद्य एकस्याः महिला-अधिवक्तायाः उपरि तस्या: पतिनाकृत क्रूरतया उत्पीडने स्वयमेव अवधानं स्वीकृतम्, त्रयः चिकित्सालयाः तस्याः आपत्कालिकोपचारं निराकृतवन्तः इति आरोपस्य अन्वेषणाय आदेशाऽपि प्रदत्तः। मुख्यन्यायाधीशः सूर्यकान्तः, न्यायाधीशः जे. जोयमल्या बागची इत्येतयोः पीठेन अधिवक्ता स्नेहा कालिता इत्यस्याः पत्रस्य आधारेण कार्याचरणम् स्वीकृतम् यत् करकरडूमा-न्यायालये अभ्यासं कुर्वती स्वसहकर्मिणां उपरि आक्रमणस्य विषये वर्णितम् आसीत्। न्यायालये सूचितं यत् पीडिता बहुवारं व्रणितासीत्, अखिल भारतीय आयुर्विज्ञान संस्थाने उपचारारम्भात् प्राक् सा अनेकेषु चिकित्सालयेषु गतवती, परञ्च ते कथितरूपेण प्रवेशं निराकृतवन्तः। अधिकारिणः उक्तवन्तः यत् एफ. आई. आर पञ्जीकृतं तथा अभियुक्तः पतिः निगडितः।

-------------------------------------------------------------

## राज्यसभा भाजपा सांसद

राज्यसभायां भाजपेति दलस्य सांसदानां सङ्ख्या त्रयोदशाधिकैकशतं यावत् वर्धिता। केन्द्रीय-संसदीय-कार्यमन्त्री किरेन रिजिजुः अद्य सामाजिक-पटले सूचितवान् यत् उच्चसदनस्य अध्यक्षः सी पी राधाकृष्णन् वर्यः आम आदमी-दलस्य सप्तसदस्यानां विलीनीकरणं स्वीकृतवान्। सांसदेषु राघव चड्ढा, डा. अशोककुमार मित्तलः, सन्दीप पाठकः, स्वाति मालीवालः, हरभजन सिङ्घः च सन्ति। विलयनानन्तरं उच्चसभायां आम आदमी-दलस्य सांसदानां सङ्ख्या अधुना त्रीणि एव अभवत्।

----------------------------------------------------------------

## बाङ्ग्लादेश कालबैशाखी

बाङ्ग्लादेशे कालबैशाखी (नोर्वेस्टर्) इत्यनेन वातचक्रेण सप्तमण्डलेषु विद्युत-पतनेन न्यूनातिन्यूनं चतुर्दश जनाः मृताः, अन्ये च अनेके व्रणिताः अभवन्। देशस्य केषुचित् भागेषु एकसप्ताहाधिकं यावत् तीव्र-उष्णतरङ्गस्य अनन्तरं वातचक्रः आगतः।

----------------------------------------------------------------

## ऋतु-विभागः

भारत-ऋतु-विभागेन (आई. एम. डी.) इत्यनेन अद्य हरियाणा, चण्डीगढ, मध्यप्रदेश, पञ्जाब, राजस्थान, उत्तरप्रदेश, बिहार, छत्तीसगढ, गुजरात, विदर्भ-प्रदेशेषु उष्णतरङ्गस्य पूर्वानुमानं प्रकटितम्। अद्य राष्ट्रिय-राजधान्यां पृथक् पृथक् स्थानेषु अपि एतादृशेः स्थितेः अपेक्षास्ति। अद्य दिल्ली-हरियाणा-चण्डीगढ-छत्तीसगढ-पश्चिम-मध्यप्रदेशेषु अपि रात्रौ उष्ण-स्थितिः भविष्यति इति विभागेन पूर्वानुमानितम्।

----------------------------------------------------------------

## आई. पी. एल.

आई. पी. एल. क्रिकेट्-क्रीडायां, अद्य दिल्ल्याः अरुण जेटली-क्रीडाङ्गणे, दिल्ली- कैपिटल्स दलं रायल्-चैलेंजरस-बेङ्गळूरु-इत्यमुं दलं सम्मुखी करिष्यति। क्रीडायाः आरम्भः सायं सार्द्ध सप्तवादने भविष्यति।

।। इति वार्ता: ।।